**दिनाङ्क :- 06.06.2025**

**प्रात: - 06:55**

**जम्मू-कश्मीरे**

जम्मू-कश्मीरे बहुप्रतीक्षितानां अभियांत्रिकी-चमत्काराणाम् - चिनाबसेतोः अञ्जीसेतोः च उद्घाटनं करिष्यति। प्रधानमन्त्री नरेन्द्र मोदी अद्य जम्मू-कश्मीर-भ्रमणकाले उधमपुर-श्रीनगर-बारामुल्ला रेललिङ्क (USBRL) परियोजनां राष्ट्राय समर्पयिष्यति। २७२ द्विसप्तत्यधिक द्विशतं कि.मी.दीर्घायाः यूएसबीआरएल-परियोजनायाः निर्माण: प्रायः चतुश्चत्वारिंशत् ४४ सहस्रकोटिरूप्यकाणां व्ययेन निर्माणंकृतम् । USBRL परियोजना पूर्णतया विद्युत्युक्तः विभागः अस्ति, यत्र ३६ सुरङ्गाः ९४३ सेतवश्च च सन्ति ।

**प्रधानमंत्री/जम्मू-कश्मीर**

प्रधानमंत्री नरेन्द्र मोदी प्रोक्तंवान् यत् जम्मू-कश्मीरे परियोजनाया: लोकर्पणं जनानां जीवने सकारात्मक परिवर्तनम् आनयिष्यति। मोदिना प्रोक्तं यत् चिनाब रेल सेतु वास्तु कलाया: अद्भतमुदाहरणम् अस्ति। श्री माता वैष्णो देवी-कटरात: श्रीनगरं यावत् वन्दे भारत रेलयाना आध्यात्मिक-पर्यटनं वर्धापयिष्यति। वृत्तीणां अवसराणि च प्रदास्थति ।

**सर्वदलीय-प्रतिनिधिमण्डलम्**

कांग्रेस सांसदस्य डॉ. शशि थरूरस्य नेतृत्व सर्वदलीयं शिष्टामण्डलं गत रात्रौ वाशिंगटने अमरीकाया: उपराष्टपतिना जे.डी. वेसेन सहमेलनम्: अकरोत् । शिष्टमण्डलं अमरीकायां भारतीय-समुदायस्य सदस्यै: सह मेलनं कृतवत्। आतंकवादस्य विरोधे ऐक्य भारतस्य संकल्पं पुनरूक्तवान्। डॉ. थरूर: अमरीकाया: राजदूतेन केन जेस्टरेण सह आतंकवादस्य विरोधे संघर्षे वार्तां कृतवान्।

**बाइट-शशि थरूर**

भारतीय जनता पार्टी दलस्य सांसदस्य रवि शंकर प्रसादस्य नेतृत्वे सर्वदलीय प्रतिनिधिमण्डलं ब्रेसल्सदेशे बेल्जिय चैम्बर्स रिप्रजेटेटिव इत्यस्य सदस्येन पीट डी. रोवरेण सहमेलनम् अकरोत्।

## प्रधानमन्त्रिणा/ एनडीए

प्रधानमन्त्रिणा नरेन्द्रमोदिना एनडीए- प्रशासनस्य एकादशौ वर्षस्य पूर्णे समावेशीवृद्ध्यै सुशासनाय निर्धनानाम् कल्याणाय च स्वप्रतिबद्धतां पुनः उक्तम्। अस्मिन् अवसरे मोदीमहोदयेन जनानां दरिद्रता: बहिः निष्कासयितु सशक्तिकरणं, सुदृढं आधारभूतसंरचनां, समावेशं च प्रति केन्द्रसर्वकारेण कृतानां पदानां उल्लेखः कृतः।

## छत्तीसगढ़-बीजापुरे

छत्तीसगढ़ बीजापुरे एक कोटि रुप्यकानां पुरस्कारवान् शीर्ष: माओवादी नेता हत: । छत्तीसगढे सुरक्षाबलेन अद्य संघर्षे सदस्यस्य वरिष्ठमाओवादिनः कार्यकर्ता नरसिंहचालम उर्फ गौतम उर्फ सुधाकर: हतः । डीआइजी आरक्षी लिस कमललोचनकश्यपः अवदत् यत् सुधाकरस्य शिरसि कोटिरूप्यकाणां पुरस्कारः आसीत्। आन्ध्रप्रदेशस्य चिन्तापलुडीग्रामस्य निवासी सुधाकरः विगतदशकत्रयं यावत् नक्सलीकार्येषु सक्रियः आसीत् । सुधाकरः महाराष्ट्र-छत्तीसगढ-तेलाङ्गाना-देशेषु अनेकेषु प्रकरणेषु वांछितः आसीत् ।

## आर.एस.एस.प्रशिक्षण शिविरम्

राष्ट्रीय स्वयं सेवक संघस्य संरसंचालक डॉ. मोहन भागवत: अद्य उक्तवान् यत् युद्धस्य परिवर्तमाने छद्म युद्ध: साइब आक्रमणानि सदृशानि भवानी । एतादृश्यां परिस्थित्यां अस्माकं देश: रक्षा क्षेत्रे आत्म-निर्भर: स्यात् । रक्षा-बल प्रशासन च स्वीय कर्तव्य निर्वहन्ति किन्तु वास्तविक-शाक्ति समाज: अस्ति।

## भारत-मध्य एशिया

विदेश मन्त्री डॉ. एस. जयशंकर: अद्य नवदिल्ल्या भारत-मध्य एशिया-वर्ताया: चतुर्थ उपवेशने कजाकिस्तानस्य किर्गिजगणराज्यस्य, तजाकिस्तानस्य, तुर्कमेनिस्तानस्य उज्बेकिस्तानस्य च विदेश मन्त्रिणाम् स्वागतं करिष्यति। सर्वे मन्त्रिणां भारत-मध्य-एशिया देशयो संबंध सुदृढीकर्तुं चर्चां करिष्यति।

## सिक्किम-एन.डी.आर.एफ

भारतीय-वायु सेनाया: द्वे एमआई सप्तदश इत्याख्ये उदग्रयाने, भारतीय सैन्यदलं, वायु सैन्यदलं राष्ट्रीय आपत् प्रतिक्रिया बलम च उत्तर-सिक्किमे पर्यटकानां निकासाय प्रयतन्ते।

## बेङ्गलूरु

बेङ्गलूरुनगरे सम्मर्दनप्रकरणे कर्णाटकस्य मुख्यमन्त्री सिद्धारमैया आरक्षि अधिकारिणाम्  निलम्बनं कारितवान। सम्मर्दने एकादश जनाः मृताः। एतदतिरिक्तं आरसीबी इवेण्ट् मैनेजरः, प्रबन्धकः डीएनए... यस्य नेतृत्वे एषः कार्यक्रमः अभवत्, तस्य विरोधे प्राथमिकी पंजीकृता ।

## शतरंज

भारतस्य डोम्माराजु गुकेश: नॉर्वे शतरंज-स्पर्धा-शृङ्खला पञ्चाविंशत्युत्तर द्विसहस्रे स्वयं चतुर्थी स्पर्धा विजितवान्।